पर्यषेणयत्। अभिषिषेणयिषति। परिषिषेणयिषति। सेध – अभिषेधति। परिषेधति। अभ्यषेधत्। पर्यषेधत्। सिच – अभिषिञ्चति। परिषिञ्चति। अभ्यषिञ्चत्। पर्यषिञ्चत्। अभिषिषिक्षति। परिषिषिक्षति। सञ्ज – अभिषजति। परिषजति। अभ्यषजत्। पर्यषजत्। अभिषिषङ्क्षति। परिषिषङ्क्षति। स्वञ्ज – अभिष्वजते। परिष्वजते। अभ्यष्वजत। पर्यष्वजत। अभिषिष्वङ्क्षते। परिषिष्वङ्क्षते। सेध इति शब्विकरणनिर्देशः सिध्यतिनिवृत्त्यर्थः। उपसर्गात् इति किम्? दधि सिञ्चति। मधु सिञ्चति। निर्गताः सेचका अस्माद् देशात् निःसेचको देशः इति नायं सिचेः उपसर्गः। [1]अभिसावकीयति इत्यत्रापि न सुनोतिं प्रति क्रियायोगः, किं तर्हि, सावकीयं प्रति। अभिषावयति इत्यत्र तु सुनोतिमेव प्रति क्रियायोगः, न सावयतिं प्रति इति षत्वं भवति॥

## सदिरप्रतेः। (६६/२२७१)

सदेः सकारस्य उपसर्गस्थान् निमित्तात् [2]अप्रतेः उत्तरस्य मूर्धन्य आदेशो भवति। निषीदति। विषीदति। न्यषीदत्। व्यषीदत्। निषसाद। विषसाद। अप्रतेः इति किम्? प्रतिसीदति॥

## स्तन्भेः। (६७/२२७२)

उपसर्गात् इति वर्तते। स्तन्भेः सकारस्य उपसर्गस्थान् निमित्तात् [3]उत्तरस्य मूर्धन्य आदेशो भवति। अभिष्टभ्नाति। परिष्टभ्नाति। अभ्यष्टभ्नात्। पर्यष्टभ्नात्। अभितष्टम्भ। परितष्टम्भ। अप्रतेः इत्येतदिह नानुवर्तते, तेन [4]एतदपि[5] भवति, प्रतिष्टभ्नाति, [6]प्रत्यष्टभ्नात्, [7]प्रतितष्टम्भ॥

## अवाच्चालम्बनाविदूर्ययोः। (६८/२२७३)

[8]अवशब्दात् उपसर्गात् उत्तरस्य स्तन्भेः सकारस्य मूर्धन्यः आदेशो भवति, आलम्बनेऽर्थे आविदूर्ये च। आलम्बनम् [9]आश्रयणम्। अविदूरस्य भावः आविदूर्यम्। आलम्बने तावत् -- अवष्टभ्यास्ते। अवष्टभ्य तिष्ठति। आविदूर्ये – [10]अवष्टब्धा सेना। [11]अवष्टब्धा शरत्। आलम्बनाविदूर्ययोः इति किम्? अवस्तब्धो वृषलः शीतेन। अनिगर्थः आरम्भः॥

---

1. वाक्यमिदं नास्ति क. 2. परस्य इत्यधिकम् इ. 3. परस्य इ. 4. इहापि इ, 5. सिद्धं इत्यधिकम् ड. ब. ह. 6. प्रतिष्टम्भः क. ड. ह, अभिष्टम्भः इत्यधिकम् ह. 7. नास्ति ड. 8. स्तन्भेः इति वर्तते इत्यधिकम् क. इ, अवात् उपसर्गात् इ. 9. समाश्रयः क, आश्रयः इ. ड. 10-11. अवष्टभ्या इ.